अन्ये त्वेवमजानन्तः श्रुत्वान्येभ्य उपासते ।

तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ १३.२६ ॥

anye tvevamajānantaḥ śrutvānyebhya upāsate |
te'pi cātitarantyeva mṛtyuṁ śrutiparāyaṇāḥ || 13.26||

यावत्संजायते किंचित्सत्त्वं स्थावरजङ्गमम् ।

क्शेत्रक्शेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ १३.२७ ॥

yāvatsañjāyate kiñcitsattvaṁ sthāvarajaṅgamam |
kśetrakśetrajñasaṁyogāttadviddhi bharatarṣabha || 13.27||

समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्

विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ १३.२८ ॥

samaṁ sarveṣu bhūteṣu tiṣṭhantaṁ parameśvaram
vinaśyatsvavinaśyantaṁ yaḥ paśyati sa paśyati || 13.28||

समं पश्यन्हि सर्वत्र समवस्थितमीश्वरम् ।

न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥ १३.२९ ॥

samaṁ paśyanhi sarvatra samavasthitamīśvaram |
na hinastyātmanātmānaṁ tato yāti parāṁ gatim || 13.29||

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।

यः पश्यति तथात्मानमकर्तारं स पश्यति ॥ १३.३० ॥

prakṛtyaiva ca karmāṇi kriyamāṇāni sarvaśaḥ |
yaḥ paśyati tathātmānamakartāraṁ sa paśyati || 13.30||